श्रीकृष्णस्तोत्रं विप्रपत्नीकृतम्

{॥ श्रीकृष्णस्तोत्रं विप्रपत्नीकृतम् ॥}

श्रीगणेशाय नमः ।

विप्रपत्न्य ऊचुः ।

त्वं ब्रह्म परमं धाम निरीहो निरहङ्कृतिः ।

निर्गुणश्च निराकारः साकारः सगुणः स्वयम् ॥ १॥

साक्षिरूपश्च निर्लिप्तः परमात्मा निराकृतिः ।

प्रकृतिः पुरुषस्त्वं च कारणं च तयोः परम् ॥ २॥

सृष्टिस्थित्यन्तविषये ये च देवास्त्रयः स्मृताः ।

ते त्वदंशाः सर्वबीजा ब्रह्मविष्णुमहेश्वराः ॥ ३॥

यस्य लोम्नां च विवरे चाऽखिलं विश्वमीश्वरः ।

महाविराङ्महाविष्णुस्त्वं तस्य जनको विभो ॥ ४॥

तेजस्त्वं चाऽपि तेजस्वी ज्ञानं ज्ञानी च तत्परः ।

वेदेऽनिर्वचनीयस्त्वं कस्त्वां स्तोतुमिहेश्वरः ॥ ५॥

महदादि सृष्टिसूत्रं पञ्चतन्मात्रमेव च ।

बीजं त्वं सर्वशक्तीनां सर्वशक्तिस्वरूपकः ॥ ६॥

सर्वशक्तीश्वरः सर्वः सर्वशक्त्याश्रयः सदा ।

त्वमनीहः स्वयञ्ज्योतिः सर्वानन्दः सनातनः ॥ ७॥

अहोऽप्याकारहीनस्त्वं सर्वविग्रहवानपि ।

सर्वेन्द्रियाणां विषयं जानासि नेन्द्रियी भवान् ॥ ८॥

सरस्वती जडीभूता यत्स्तोत्रे यन्निरूपणे ।

जडीभूतो महेशश्च शेषो धर्मो विधिः स्वयम् ॥ ९॥

पार्वती कमला राधा सावित्री देवसूरपि ।

वेदश्च जडतां याति के वा शक्ता विपश्चितः ॥ १०॥

वयं किं स्तवनं कूर्मः स्त्रियः प्राणेश्वरेश्वर ।

प्रसन्नो भव नो देव दीनबन्धो कृपां कुरु ॥ ११॥

इति पेतुश्च ता विप्रपत्न्यस्तच्चरणाम्बुजे ।

अभयं प्रददौ ताभ्यः प्रसन्नवदनेक्षणः ॥ १२॥

विप्रपत्नीकृतं स्तोत्रं पूजाकाले च यः पठेत् ।

स गतिं विप्रपत्नीनां लभते नाऽत्र संशयः ॥ १३॥

॥ इति श्रीब्रह्मवैवर्ते विप्रपत्नीकृतं श्रीकृष्णस्तोत्रं

समाप्तम् ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Krishna Stotram (By Viprapatni) Lyrics in Devanagari PDF
% File name : viprapatnikrishnastotra.itx
% Location : doc_vishhnu
% Author : viprapatnI,brahmavaivarta purANa
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : WebD
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
% Description-comments : brahmavaivarta
% Latest update : September 07, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website